**दिनाङ्कः- 06.06.2026　　　　　　　　　सायं- 06:20**

**आदौ मुख्यवार्ताः**

- **प्रधानमन्त्रिणा नरेन्द्रमोदिना आर्थिक-परामर्श-परिषदः सदस्यैः सह एकस्याः सभायाः अध्यक्षता कृता; भारतस्य आर्थिकपरिवर्तनस्य दीर्घकालिक विकासप्राथमिकतानां विषयेषु च विस्तृताः विषयाः चर्चिताः।**
- **विदेशमन्त्री डा. एस्. जयशङ्करः अद्य सायङ्काले नवदिल्ल्यां नेपालदेशस्य विदेशमन्त्रिणा शिशिर खनाल इत्यनेन सह वार्तालापं करिष्यति।**
- **पञ्जाबे अद्य प्रातः फ़िरोज़पुर-फाजिल्का-मार्गे वाहन ट्रक्-यानयोः सह सङ्घट्टे-न्यूनातिन्यूनं नव जनाः मृताः।**
- **सी. बी. एस. ई. इत्यनेन अङ्कानां सत्यापनाय पुनर्मूल्यांकनाय च आवेदनपत्राणां प्रस्तुतीकरणस्य अन्तिमातिथिः श्वः पर्यन्तं विस्तारिता।**

**अपि च**

- **क्रिकेट्-क्रीडायां, सूर्यकुमार यादवस्य स्थाने श्रेयस अय्यरः भारतीय दलस्य नूतनः टी-20 इति अन्ताराष्ट्रिय-दलस्य नायकः नियुक्तः; वैभवः सूर्यवंशी च प्रथमं वारं दले समाविष्टः।**

**अथवार्ताः**

**प्रधानमन्त्री आर्थिक-परिषद - उपवेशनम्**

**प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य आर्थिक-परामर्श-परिषदः सदस्यैः साकं विहितोपवेशनस्य अध्यक्षता विहिता। उपवेशने परिषदीय-सदस्याः प्रधानमन्त्री च भारतस्य आर्थिक-वृद्धि उन्नेतुं विभिन्न-विचाराणां, उपायानां च विषये चर्चितवन्तौ। जीवन-स्तरे, व्यापारे च सुगमतामानेतुं अपि विचार-विमर्शः जातः। सदस्यैः पश्चिमैशिया संघर्षे भारत-विश्वे च परिलक्षितानां प्रभावानां आकलनविषयेऽपि सम्भाषणं कृतम्। सामाजिक-अन्तर्जालीय-सन्देशे प्रधानमन्त्रिणा प्रोक्तं यत् भारतीय-अर्थव्यवस्थायाः संरचनां, दीर्घकालिक-विकास-प्राथमिकता**

सम्बद्ध-प्रकरणानां विषये भारतं द्रुतगत्या अग्रेसरति। प्रधानमन्त्रिणा विविध-विषयेषु स्वविचारा: प्रकटिता: सुगमजीवनम् एवं सुगम-व्यवसाय: इत्येतयो: विषये अपि चर्चा जाता।

<u>विदेशमन्त्री-नेपालोपवेशनम्</u>

विदेशमन्त्री डा. एस. जयशङ्करः अद्य सायङ्काले नवदिल्ल्यां नेपालदेशस्य विदेशमन्त्रिणा शिशिर खनाल इत्यनेन सह वार्तालापं करिष्यति। नेपाल-देशस्य विदेश-मन्त्रालयेन उक्तं यत् उपवेशनावधौ उभौ पक्षौ परस्पर-हितानां विषयेषु चर्चिष्यतः, यस्मिन् व्यापारः, निवेशः, सम्पर्कः, ऊर्जा, जनसम्पर्केत्यादिषु प्रमुखेषु क्षेत्रेषु सहकारं वर्धितुं शक्यते। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् इयं यात्रा भारत-नेपाल-देशयोः विशेषसहभागित्वम् इतोऽपि सुदृढं करिष्यति। सः अवोचत् यत् द्वयोः देशयोः मध्ये चर्चासु विकाससहयोगः, जनेषु सम्बन्धः, व्यापारः, निवेशादि विस्तृताः कार्यक्रमाः सम्मिलिताः सन्ति।

<u>पञ्जाब-दुर्घटना</u>

पञ्जाब-राज्ये अद्य प्रातः फ़िरोज़पुर-फाजिल्का-मार्गे एकस्यैव कुटुम्बस्य सदस्यान् वहन्तं वाहनस्य ट्रक्-यानेन सह संघट्टे न्यूनातिन्यूनं नव जनाः मृताः, द्वाविंशति जनाः च व्रणिताः। पीडिताः, सर्वे एकस्यैव कुटुम्बस्य सदस्याः आसन्, ये परिवारे मृतस्य एकस्य जनस्य अस्थि-विसर्जनाय व्यास-नद्यां गच्छन्तः आसन् तदैव एषा दुर्घटना अभवत्। बहवः जनाः घटनास्थले एव मृताः इति कथ्यते, अपि च व्रणिताः चिकित्सायै फ़िरोज़पुर्-सिविल-चिकित्सालये, फरीदकोट-चिकित्सकीय-महाविद्यालये च प्रेषिताः। आरक्षकाधिकारिणः आकाशवाण्या सह वार्तालापे उक्तवन्तः यत् द्वाविंशति जनेषु बहवः गम्भीराः सन्ति। घटनायाः अनन्तरं शीघ्रमेव वरिष्ठाः आरक्षकाधिकारिणः दुर्घटनास्थलं प्राप्य स्थानीयनिवासिनां साहाय्येन उद्धारकार्यम् आरब्धवन्तः। व्रणिताः निष्कास्य समीपस्थेषु चिकित्सालयेषु प्रवेशिताः।

<u>सी.बी.एस.ई.</u>

सी.बी.एस.ई. इति केन्द्रीय-माध्यमिक-शिक्षा-परिषदा अङ्क-सत्यापनार्थं सहैव पुनर्मूल्याङ्कनार्थं आवेदन-प्रस्तुतेः अन्तिमा तिथिः श्व: पर्यन्तं वर्धिता। सामाजिकान्तर्जालीय पटले एकेन सन्देशेन परिषदा प्रख्यापितं यत् छात्राः इदानीं श्व:

मध्यरात्रिं यावत् स्व-आवेदनानि प्रस्तोतुं शक्नुवन्ति। सी. बी. एस. ई. परिषदा प्रोदीरितं यत् छात्रहितं मनसि निधाय, आवेदन-प्रक्रियां पूरयितुं छात्रेभ्यः अतिरिक्त-समयप्रदानाय एषः निर्णयः स्वीकृतः । एतस्मात् पूर्वम् आवेदनस्य अन्तिमा तिथिः अस्य मासस्य षड् दिनाङ्कं यावत् आसीत्। परिषदा सर्वेभ्यः योग्य-छात्रेभ्यः परामृष्टं यत् ते निर्धारित-समये एव स्व-आवेदन-प्रक्रियां सम्पादयन्तु।

<u>मम भारत युव- सम्मेलन</u>

केन्द्रीय-युवकार्य - क्रीडामन्त्री मनसुख-माण्डवीयः अद्य भषितवान् यत् भारतीय युवजनाः राष्ट्रस्य महत्तमा शक्तिः विद्यन्ते। तथा च ते सप्तचत्वारिंशदुत्तर-द्विसहस्रतम-वर्ष पर्यन्तं विकसित-भारतस्य स्वप्नं प्रत्यक्षीकरणे प्रमुखां भूमिकां निर्वहिष्यन्ति। नवदिल्ल्यां समायोजिते विकसित-भारताय-युवा-मम भारतम् युवा-सम्मेलनम् सम्बोधयन् असौ उक्तवान यत् प्रधानमन्त्रिणा नरेन्द्र मोदिना यूनां विचाराणां, स्वाभिलाषाणां, राष्ट्रनिर्माणाय स्वैच्छिक- सेवाभावस्य आदान-प्रदानार्थं मम भारतं इति मञ्चः विनिर्मितः।

<u>दिल्ली - मालवीय अग्निः</u>

दिल्ल्यारक्षिदलेन मालवीय-नगर-अग्निकाण्डस्य सम्बन्धे केशव-नेगी नामाख्यं भोजनालयस्य पाचकः निगृहितः। एषः अग्निकाण्डः अस्य मासस्य तृतीय-दिवसे मालवीय-नगर-स्थिते एकस्मिन भोजनालये सञ्जातः। अस्यां दुर्घटनायां एकविंशतिः जनाः मृत्युपगताः, चत्वारिंश्च्चाहताः। पूर्वमेव आरक्षिदलेन भोजनालयस्य स्वामी हत्यायाः, अन्येषां सम्बद्ध-अपराधानां आरोपेषु गृहीतः आसीत्। आरक्षिदलेन सूचितं यत् प्रकरणस्यास्य अन्वेक्षणमपि प्रचलति ।

<u>राजनाथ-सकलगृहयोपादन-वृद्धिः</u>

रक्षामन्त्री राजनाथसिंहः उक्तवान यत् भारतम् अद्यापि विश्वस्य शीघ्रतम- वर्धमानानां प्रमुख-अर्थव्यवस्थानां मध्ये विशिष्टस्थानं धारयति। साम्प्रतं बहवः देशाः आर्थिक-अनिश्चिततां सम्मुखीकुर्वन्ति। गत-प्रवर्तमान- वित्तवर्षयोः मध्ये सप्त दशमलव सप्त प्रतिशत-सकल गृहयोत्पादनवृद्धेः उल्लेखं कुर्वन् श्री सिंह अवदत् यत् एषा उपलब्धिः भारतीय- अर्थव्यवस्थायाः दृढ़तां अथ च अन्तर्निहितं सामर्थ्यं प्रदर्शयित। यह गतद्वादशवर्षेषु विकसितमस्ति। सामाजिक-अन्तर्जाल-माध्यमे

**प्रकाशिते सन्देश सः उक्तवान् यत् प्रधानमन्त्री नरेन्द्र मोदिनः नेतृत्वे भारतम् आर्थिक वृद्धिं सन्धारयितुं, आर्थिकविकासेन सह संयोजितवान्।**

**हॉकी-एशियाकप्**

**हॉकीति क्रीडायां भारतीय-पुरुष-दलेन अद्य काकामि-गाहारा-नगरे आयोजिते निर्णायक-स्पर्धायां आतिथेय-जपान-दलम् चत्वारि एकम् इत्यङ्कैः पराजित्य तृतीयवारं एशिया-कप-अण्डर-18 विजितम्। तत्रैव भारतीय-महिला-दलेनापि दक्षिणकोरिया-दलम् त्रीणि शून्यं इत्यङ्कैः पराजित् कांस्यपदकं विजितम्।**

**बीसीसीआई भारतीयदलम्**

**भारतस्य क्रिकेट्-नियन्त्रण-मण्डलेन बी.सी.सी.आई. इत्यनेन अद्य इंग्लैण्ड-आयरलैंण्ड-देशयोः क्रीडा यात्रायै षोडशसदस्यानां विंशति प्रति विंशति अन्ताराष्ट्रिय-दलस्य घोषणा कृता। सूर्यकुमार यादवस्य स्थाने श्रेयस अय्यरः भारतस्य नूतनः टि-20 इति दलस्य नायकत्वेन नियुक्तः। अपि च, तिलक वर्मा उपनायकरूपेण नामाङ्कितः अस्ति। बी. सी. सी. आई. इत्यनेन प्रथमवारं वैभव सूर्यवंशी इत्यमुम् अपि दले समाविष्टम्, येन गत आई. पी. एल. सत्रे सर्वाधिक धावनांकाः समर्जिताः। प्रिंसयादवोपि दले सम्मिलितः अस्ति। अद्य मुम्बई-नगरस्य बी. सी. सी. आई. मुख्यालये आयर्लैण्ड-इंग्लैण्ड-देशयोः यात्रायै, जपान्-देशे एशियन्-गेम्स क्रीडायाः कृते, तथा भारत-अ-दलस्य श्रीलङ्का-प्रवासस्य (बहु-दिवसीय-क्रीडायाः) कृते दलस्य निर्णयार्थं मुख्य-चयनकर्ता अजित-अगरकरस्य, बी. सी. सी. आई. इत्यस्य सचिवस्य देवजीत-सैकिया इत्यस्य च नेतृत्वे भारतीय दलस्य पुरुष-चयनसमितेः सभायाः अनन्तरं दलस्य घोषणाऽभवत्।**

**।। इति वार्ताः।।**